# Shri Vivekananda Ashtakam

# श्रीविवेकानन्दाष्टकम्

## Document Information

Text title : Shri Vivekananda Ashtakam

File name : vivekAnandAShTakam.itx

Category : deities_misc, gurudev, rAmakRiShNa, aShTaka

Location : doc_deities_misc

Author : Kalipadabandyopadhyaya

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# श्रीविवेकानन्दाष्टकम्

दधद् दिव्यज्योतिः परमरमणीयं नयनयोः
प्रसन्नास्यः सौम्यो मुनिकनकशोभाधरवपुः ।
सुधीः सत्यद्रष्टा भुवनवरणीयः श्रुतिधरो
विवेकानन्दोऽसौ मनुजतनुधारी स्मरहरः ॥ १॥

किशोरो ध्यानस्थो भुजगभयशून्यो ह्यविचलो
युवा दण्डी वैश्वानरसदृशदीप्तिर्भुवि चरन् ।
स्वधर्म-भ्रष्टानां कलुषित-धियां त्राणनिरतो
विवेकानन्दोऽसौ गहनतिमिरे भास्वररविः ॥ २॥

गुरोरन्तेवासी परमपुरुषस्य प्रियतमो
नरेन्द्रः सर्वेषामवनतजनानामभयदः ।
प्रतिज्ञायां भीष्मो विपदि च महीध्रोन्नतशिरो
विवेकानन्दोऽसौ कुसुमललितो वज्रकठिनः ॥ ३॥

गृहे वित्ताभावाद्विचलितमनाः शान्तिरहितो
गतो बारं बारं गुरुवचनतो मातृसदनम् ।
"धनं मातर्देही" इत्यनुनयवचस्तु प्रतिहतं
विवेकानन्दः किं भवति धनतृष्णावशगतः ? ॥ ४॥

गुरोः पादं ध्यात्वा किमपि नवतेजो हृदि वहन्
महासिन्धुं तीर्त्वा निखिलजगतो धर्मसदसि ।
नवीनः संन्यासी विजित जयमाल्यो बहुमतो
विवेकानन्दोऽसौ भुवनविजयी भारतनिधिः ॥ ५॥

अविद्याया बैरी श्रुतिविहितविद्यामधुकरः
सुखे चानासक्तः परमपदचिन्तास्थिरमतिः ।
जगत् सेवा मन्त्रैर्जगदधिपतेः पूजनपरो
विवेकानन्दोऽसौ भुवि सुविरलो मानवगुरुः ॥ ६॥

दरिद्राणां बन्धुर्निखिलमनुजानां प्रियकरः
समो ज्ञाने कर्मण्यविचलितभक्त्यां गुरुपदे ।
समः शत्रौ मित्रेऽप्रतिममहिमोद्दीप्ततपनो
विवेकानन्दो मे हृदयगगने भातु सततम् ॥ ७॥

अभय वरद मूर्तिःकालिका-विश्वधात्री-
चरणकमल संस्थौ शारदा-रामकृष्णौ ।
शरणगत विवेकानन्द सानन्दमूर्तिः
भवभयहरशून्यं पश्य रे मुग्धनेत्रे ! ॥ ८॥

इति श्रीकालीपदबन्द्योपाध्यायविरचितं “श्रीविवेकानन्दाष्टकम्” सम्पूर्णम् ।

Proofread by Aruna Narayanan

*Shri Vivekananda Ashtakam*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*